[1]विपूयः[A]-पव्यम्, [2]अवश्यपाव्यम्, पाव्यम्, पिपविष्यम्, पोपूय्यम्;
पूयमानः, पाव्यमानः, पिपविष्यमाणः, पोपूय्यमानः;
[3]पवः, [4]निष्पावः, [5]उत्पावः, [6]पोत्रम्, [B]वनपोत्रः, [7]पवित्रम्, पावः, पिपविषः, पोपूयः;
पवितुम्, पावयितुम्, पिपविषितुम्, पोपूयितुम्;
पूतिः, पावना, पिपविषा, पिपावयिषा, पोपूया;
पवनम्, पावनम्, पिपविषणम्, पोपूयनम्;
पूत्वा-पवित्वा,[C] पावयित्वा, पिपविषित्वा, पोपूयित्वा;
प्रपूय, प्रपाव्य, प्रपिपविष्य, प्रपोपूय्य;
पावम् २ / पूत्वा २-पवित्वा २ } पावम् २, पावयित्वा २, } पिपविषम् २, पिपविषित्वा २, } पोपूयम् २; पोपूयित्वा २. }

---

1. 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इत्यनेन मुञ्जेऽभिधेये विपूर्वकादस्मात् क्यपि रूपमेवम्। अन्यत्रार्थे तु 'अचो यत्' (3-1-97) इति यति, अवादेशे च **पव्यम्** इति रूपम्।
2. '**ओरावश्यके**' (3-1-125) इति ण्यत्। आवादेशः। अवश्यमो मकारस्य 'लुम्पेदवश्यमः कृत्ये' (काशिका. 6-3-109) इति लोपः।
3. '**ऋदोरप्**' (3-3-57) इति भावेऽप्प्रत्ययः। घञपवादः।
4. 'निरभ्योः पूल्वोः' (3-3-28) इति निष्पूर्वकादस्मात् घञ्। **निष्पावः**=धान्यविशेषः। 'परिमाणाख्यायां सर्वेभ्यः' (3-3-20) इति घञ्यपि रूपमेवमेव। तदानीं **निष्पावः**=परिमाणविशेषः।
5. 'उदि श्रयतियौतिपूद्रुवः' (3-3-49) इति घञ्।
6. 'हलसूकरयोः **पुवः**' (3-2-183) इति करणे ष्ट्रन्प्रत्यये रूपम्। **पोत्रम्**=सूकरस्य, हलस्य वा मुखम्।
7. '**पुवः** संज्ञायाम्' (3-2-185) इति करणे इत्रप्रत्ययः। **पवित्रम्**=दर्भः, चक्रायुधं च।

A. 'वसानां वल्कले शुद्धे **विपूयैः** कृतमेखलाम्।' भ. का. 6-61.

B. 'भूदार एव **वनपोत्र**वतामतानीत् भूदारशब्दमसहिष्णुरिवान्तमेषाम्॥' च. भा. 1.20.

C. 'सूतोऽपि गङ्गासलिलैः **पवित्वा** सहाश्वमात्मानमनल्पमन्युः।' भ. का. 3.18.